# कारकं, तस्य भेदाः, विभक्तिः तस्याः भेदाश्च

कौशिक-पात्रः
सहकारी अध्यापकः
संस्कृत-विभागस्य
शालतोड़ा नेताजी सेन्टिनारी कलेज इति महाविद्यालयस्य
शालतोड़ा, बाँकुड़ा, पश्चिमबङ्ग
इ-मेल- patrakousikjrf@gmail.com

# किं नाम कारकम्?

**अक्षरम्** – न क्षीयते इति अक्षरम् ।

**पदम्** – सुप्तिङ्.न्तं पदम् । क्रमवतां वर्णानां समूहः पदम् ।

**वाक्यम्** – एकतिङ्. वाक्यम् । अथवा कारकान्विता क्रिया वाक्यम् ।

**कारकम्** – क्रियान्वयित्वं कारकत्वम् ।

अन्वयः - **सम्बन्धः इति ।**

**क्रियया सह सम्बन्धः अस्ति यस्य तत् कारकम् इति । कारकाणि षड् सन्ति ।**

# कारकस्य भेदाः

"कर्ता कर्म च करणं सम्प्रदानं तथैव च ।
अपादानाधिकरणमित्याहुः कारकाणि षट् ।।"

-अर्थात् कारकाणि षड् सन्ति । यथा-

1. कर्तृकारकम्,
2. कर्मकारकम्,
3. करणकारकम्,
4. सम्प्रदानकारकम्,
5. अपादानकारकम्,
6. अधिकरणकारकं च ।

सम्बन्धः कारके न गण्यते यतोहि अस्य क्रियया सह साक्षात् सम्बन्धः नास्ति ।

# उदाहरणानि

1- <u>पाचक:</u> पचति – अत्र पाचक: (कर्ता) पाचनक्रियायाम् अन्वेति अत: कारकसंज्ञां धारयति ।

2- <u>गां</u> स्पृशति – अत्र गौ: (कर्म) स्पर्शनक्रियायाम् अन्वेति अत: कारकसंज्ञां धारयति

3- <u>परशुना</u> छिनत्ति – अत्र पशु: (करणम्) छेदनक्रियायाम् अन्वेति अत: कारकसंज्ञां धारयति ।

4- <u>बालाय</u> फलं ददाति – अत्र बाल: (सम्प्रदानम्) दानक्रियायाम् अन्वेति अत: कारकसंज्ञां धारयति ।

5- <u>प्रासादात्</u> पतति – अत्र प्रासाद: (अपादानम्) पतनक्रियायाम् अन्वेति अत: कारकसंज्ञां धारयति ।


6- <u>पीठे</u> उपविशति – अत्र पीठम् (अधिकरणम्) उपवेशनक्रियायाम् अन्वेति अत: कारकसंज्ञां धारयति ।

कर्तृकारकं क्रियायां साक्षात् अन्वेति । अन्यानि कारकाणि तु परम्परया क्रियायाम् अन्वयं प्राप्नुवन्ति इति ।

इदं परिशील्यताम्

कः, कां, केन, कस्मै, कस्मात्, कुत्र ददाति इति प्रश्नः (अयोध्यायाः) राजा, गां, हस्तेन, विप्राय, गोष्ठात्, गंगातीरे ददाति इति वाक्येन समाहितः भवति । अतः दानक्रियायां षडपि कारकाणि अन्वितानि भवन्ति इति स्पष्टम् ।

अयोध्यायाः अन्वयः राज्ञि एव, न तु दानक्रियायाम् । अतः षष्ठी विभक्तिः (सम्बन्धः) कारकं न इति ।



# विभक्तिः

- विभक्तीनां प्रवृत्तौ कारकं प्राधान्यम् आवहति । कारकसंज्ञां पुरस्कृत्य या विभक्तिः प्रवर्तते सा कारकविभक्तिः इति उच्यते । यथा – ग्रामं गच्छति । अत्र द्वितीया कर्मकारकसंज्ञां पुरस्कृत्य प्रवृत्ता । अतः एषा कारकविभक्तिः ।
- यत्र कारकत्वस्य न प्रसक्तिः तत्र परिगणितानां केषाञ्चन पदानाम् अर्थेन योगोऽपि विभक्तेः प्रवृत्तौ निमित्तं भवति । यथा – हरिं विना सुखं नास्ति । अत्र ‘विना’ इत्यस्य अर्थेन युक्तः हरिः । विना इत्यस्य अर्थेन योगादेव हरिशब्दात् द्वितीया प्रवृत्ता । अतः एषा उपपदविभक्तिः इति उच्यते । प्रथमायाः प्रवृत्तौ निमित्तं प्रातिपदिकार्थः सम्बोधनञ्च । यथा – उच्चैः गृहम् । हे राम । स्वस्वामिभावादिसम्बन्धोऽपि विभक्तिप्रवृत्तौ निमित्तम् । यथा – राज्ञः पुरुषः । अत्र राजपदात् षष्ठी श्रूयते । सा षष्ठी स्वस्वामिभावसम्बन्धं पुरस्कृत्य प्रवृत्ता ।

# कारकविभक्तयः

- प्रथमाविभक्तिः
- द्वितीयाविभक्तिः
- तृतीयाविभक्तिः
- चतुर्थीविभक्तिः
- पञ्चमीविभक्तिः
- षष्ठीविभक्तिः
- सप्तमीविभक्तिः

- कृद्योगे कर्तरि कर्मणि च प्रवर्तमाना (न तु सम्बन्धं पुरस्कृत्य प्रवर्तमाना ) षष्ठी अपि (श्लोकस्य पठनम् इत्यादौ )कारकविभक्तिः एव । तृतीयाविभक्तिः कर्तरि, करणे च प्रवर्तते इति विशेषः । उपपदविभक्तयः अपि ताः एव द्वितीया, तृतीया, चतुर्थी, पञ्चमी, सप्तमी चेति । यथा –कृष्णम् अभितः गावः । अक्ष्णा काणः । सर्वेभ्यः स्वस्ति । कृष्णात् अन्यः अयम् । मातरि साधुः इति ।
- कर्मप्रवचनीयः इति काचित् संज्ञा । सा संज्ञापि द्वितीयायाः पञ्चम्याः सप्तम्याः च प्रवृत्तौ निमित्तं भवति । यथा – वृक्षं प्रति विद्योतते विद्युत् । आ हिमालयात् । अधि भुवि रामः इति । वस्तुतस्तु उपपदवि भक्तौ एव अस्य अन्तर्भावः ।

# पाणिनेः क्रमः

- पाणिनेः अयं क्रमः । आदौ अपादानादिकारकसंज्ञां विधत्ते 'ध्रुवमपायेऽपादानम् – १.४.२४' इत्यादिना सूत्रेण प्रथमाध्याये चतुर्थपादे । ततो विभक्तिं विधत्ते 'कर्मणि द्वितीया' इत्यादिना सूत्रेण द्वितीयाध्याये तृतीयपादे । तत्रैव उपपदविभक्तिं षष्ठी विभक्तिञ्च विधत्ते । प्रथमाविभक्तिं प्रातिपदिकार्थं पुरस्कृत्य विधत्ते, याम् एतां प्रथमां 'षष्ठी शेषे -२.३.५०' इति सूत्रात्प्राक् प्राह । एवञ्च 'आदौ कारकं निश्चेतव्यम् । ततो विभक्तिः विधेया' इत्येषः क्रमः कारकविभक्तौ इति ज्ञेयम् ।

# धन्यवाद:

